योगः कर्मसु कौशलम्

AHNIK VARTA PATRAM
Email - ahnikvartapatram@gmail.com

आह्निक वार्ता पत्रम्

RNI No. : UPSAN/2018/76680

वर्ष-3 अंक 279 संस्कृत दैनिक/ प्रात; संस्करण | प्रयागराज 03 अगस्त 2021 मंगलवार | पृष्ठ-4 | मूल्य- 2 रुपये

सुभाषितम्

काव्यशास्त्रविनोदेन कालो
गच्छति धीमतां।
व्यसनेन च मूर्खाणां निद्रया
कलहेन वा।।

अर्थ – बुद्धिमान लोग काव्य-शास्त्र का अध्ययन करने में अपना समय व्यतीत करते हैं। जबकि मुर्ख लोग निंद्रा, कलह और बुरी आदतों में अपना समय बिताते हैं।

संक्षिप्तवार्ताः

सप्तवर्षपूर्वे परीक्षां सम्पाद्य परिणाम घोषणा विस्मृतः राजस्थान सर्वकारः



जयपुरः। राजस्थाने विगत 7 वर्षतः राजकीयेसु देवालयेसु पूजकाः नियुक्तये प्रतीक्षारता सन्ति। 2014 ईसवीये वर्षे परीक्षां आकारित्वा राजस्थान सर्वकारः परीक्षा परिणामं नैव घोषितवान् तदनन्तरं वृत्ति विहीनः पूजकाः आयुः अतिक्रान्ताः अभवन्। सर्वकारः परीक्षां सम्पाद्य अपिनियुक्तयः न निर्गतवती। पूजकानाम् अभावे मन्दिराणि पिहितानि।

प्रयागराजः। 'नगर निगम' इति विभागः जनानां सुविधादृष्ट्या गृहकरे धनमुक्तिकृते समयावधिवृद्धिं कृतवान्।

16 अगस्ततः अर्द्ध क्षमतयासहसर्वाविद्यालयान् उद्घाटनस्य निर्णयः क्रियतेस्म , आनलाइन कक्षाः चलिष्यन्ति

उत्तरप्रदेशे 16 दिनांकतः विद्यालयेसु अध्यापनं,1सितम्बरतः उद्घाटिष्यन्ते महाविद्यालयाः विश्वविद्यालयाश्च




लखनऊ/प्रयागराजः। उत्तरप्रदेशे वैश्विक महामार्याः कोरोना विषाणोः संक्रमणे प्रभावपूर्णे नियंत्रणानन्तरे योगी आदित्य नाथस्य सर्वकारः शनैः शनैः सर्वागतिविधयः सामान्य कर्त्तुं प्रयासरतः। अस्मिन् क्रमे सर्वकारः इदानीं शिक्षण संस्थानमपि उद्घाटयितुं सज्जीभूता। मन्यते स्वतंत्रता दिवसानन्तरं प्रदेशे विश्वविद्यालयः महाविद्यालयाश्च उद्घाटिष्यन्ते। योगी आदित्यनाथ सर्वकारः प्रदेशेकोरोना संक्रमणस्य सुष्ठुतरां स्थितिं पश्यन् प्राथमिक, माध्यमिक, उच्च, प्राविधिक व्यावसायिकं च शिक्षण संस्थानानि उद्घाटनाय निर्णीतवान्। अस्यैव उपक्रमे सोमवासरे मुख्यमंत्री योगी आदित्यनाथः उप मुख्यमंत्री दिनेश शर्मा, प्राथमिक शिक्षामंत्री सतीश द्विवेदी अथ च दलम्-9 अधिकारिभिः सहलोक भवने गोष्ठी कृतवान् यस्याः पश्चात् 16 अगस्ततः अर्द्ध क्षमतया सहसर्वा विद्यालयान् उद्घाटनस्य निर्णयः क्रियतेस्म।

प्रदेशे सम्प्रति कक्षाएकतः आरभ्य अष्ट पर्यन्तम् कक्षानाम् छात्रान् विद्यालयेसु नैव आवाहिष्यन्ते। एतेषां ऑन लाइन कक्षाः चलिष्यन्ति। माध्यमिक शिक्षायाम् कक्षानवतः 12 पर्यन्तानाम् छात्रान् 50-50 प्रतिशतस्य अनुपाते विद्यालये आहूताः भविष्यन्ति।

माध्यमिक शिक्षायाम् कक्षानवतः 12 पर्यन्तानाम् छात्रान् 50-50 प्रतिशतस्य अनुपाते विद्यालये आहूताः भविष्यन्ति







होक्कि- भारतं पूर्वान्त्यचक्रे

TOKYO 2020

टोक्यो। पुरुषाणां होक्कि क्रीडा परम्परायां भारतं पूर्वान्त्यचक्रं प्राविशत्। अत्यन्तमुत्साह भरिते चतुर्थां शचक्रे ब्रिट्टनदलं 3-1 इति लक्ष्यकन्दुक क्रमेण पराजित्य एव भारतस्य पूर्वान्त्यचक्र प्रवेशः। कुजवासरे सम्पत्यमानायां तस्यां स्पर्धायां प्रतियोगी बेल्जियदलः। विनितानां होक्कीस्पर्धायां अद्य भारत-आस्ट्रेलिययोः चतुर्थांशचक्रं सम्पद्यते।

लमोण्ट् मेर्सलः शीघ्रतमः धावकः



ह्यः सम्पन्नायाः पुरुषाणां 100मीटर धावनक्रीडायाः अन्तिमचक्रे इट्टलीराष्ट्रतः लमोण्ट् मेर्सल् जेकबः प्रथमस्थानं प्राप्य 9.8सेकन्ड् समयः. सुवर्णपदकं लब्धवान्। अमेरिक्कायाः फ्रड् कार्ले रजतपदकं , कानडायाः आन्द्रे डि ग्रासे कांस्यपदकं च प्राप्तवन्तौ।

ओलिम्पिक्स् मध्ये भारतस्य 'अभिमानसिन्धुः'

टोक्यो जापान ओलिम्पिक्स् क्रीडासु ह्यः भारतस्य आभिमानदिनम्। महिलानां पिच्छकन्दुकक्रीडायां भारतस्य पि वि सिन्धू कांस्यपदकं प्राप्तवती। तृतीयस्थानाय सम्पन्नायां स्पर्धायां चीनराष्ट्रस्य हे बिङ् जियावो नामिकां 21-13, 21-15 इति अङ्क्रमेण पराजित्य एव पि वि सिन्धू भारतस्य अभिमानसिन्धुरभवत्। 2016 तमस्य 'रियो ओलिम्पिक्स' मध्ये सिन्धू अस्मिन्नेवाधिकरणे रजतपदकं प्राप्तवती आसीत्। अनुस्यूततया द्वितीये ओलिम्पिक्स् महोत्सवे च पदकप्राप्ता प्रथमा महिला भवति पि वि सिन्धू।





मध्यप्रदेशे अतिवृष्टिः गृहाणि भूमिसात् अभवत्, षट् जनाः मृताः

भोपालः। भारतस्य उत्तरभागे वृष्टिः अनुवर्तिते सति मध्यप्रदेशे दौ गृहे अधः पतिते षट् जनाः मृताः च। रेवा जनपदे एकस्य कुटुम्बस्य चत्वारः जनाः गृहपतनेन मृताः। द्वे शिशवे तयोः पिता पितामही च मृताः। सिङ्गोली जनपदे एकस्य कुटुम्बस्य द्वे शिशवे अपि मृतेषु स्तः। अतिवृष्टिः रक्षाप्रवर्तनान् बाधते। भोपाल, रेवा, सिद्धि, साह, सन्न आदि जनपदेषु जाग्रतानिर्देशः ख्यापितः अस्ति। राजस्थानस्य जोधपुर रेल् विभागस्य यान पन्था जल प्रवाहे निष्कासितः। मार्गाः अपि भग्नाः। पश्चिमवंगः जम्मु-काश्मीरं जार्खण्डप्रदेशेषु वृष्टिः इदानीमपि अनुवर्तते।



प्राचीन देवापट्टी सरोवरस्य तटे मन्दिर निर्माणं भविष्यति



प्रतापगढ़। वार्ताहरः। प्राचीनदेवापट्टी सरोवरस्य तटे मन्दिर निर्माणं भविष्यति। प्राचीनदेवा पट्टीतड़ागः रानीगंज प्रतापगढ़ तटे नर्मदेश्वर महादेव मन्दिर निर्माणाय एकत्री भूतः समाजः। श्रीराम मन्दिर शिलान्यास दिवसे 5 अगस्ते विश्व व्यापके हर्षावसरे ग्रामीणाः एकत्री भूय नर्मदेश्वर महादेवस्य स्थापनां कृत्वा सरोवरस्य प्रबन्धनं कुर्वन् नवग्रह वाटिकायाः अपिस्थापना करिष्यन्ति। सरोवरस्यास्य रमणीयता संवर्धनं कृत्वापर्यटन योग्यः निर्मातुं प्रयासः भवति समाज सेवकः नदी उद्धारकः समाज शेखरस्य नेतृत्वे।

'मिस्ड कॉल' इति माध्यमेन संस्कृत भाषामध्येतुं शक्नोति



डॉ. वाचस्पति मिश्रः

लखनऊ। अधुना 'मिस्ड कॉल' (9522340003) इति माध्यमेन व्ययं विनापि कोऽपि विंशतिहोरायां संस्कृत भाषामध्येतुं शक्नोति। एतच्चमत्कृत योजना सूत्रधारः उ0प्र0 संस्कृत संस्थानस्य अध्यक्षः डॉ0 वाचस्पति मिश्रः प्रदेशे संस्कृत भाषां सामान्य जनलाभाय स्वविवेकेन अनुसन्ध्य एकां योजनां विरचितवान्। संस्कृतविषयं नीत्वा 'सिविल सेवा' इति परीक्षाकृते ये अभ्यर्थिनः सन्ति, तेषां कृते संस्कृत संस्थानं सर्वप्रकारेण तत्परमस्ति।

सम्पादकीयम्

न्याये आक्रमणं चिन्ताजनकं

न्यायपालिकायाः राष्ट्रे समाजे वा महनीया भूमिका भवति। न्यायालयेनपीाड़ित जनाः न्यायं प्राप्य स्व अस्तित्वं रक्षां कुर्वन्ति। अस्तु न्यायालयाः एव अन्तिमं शरणं असहायाय सिद्धयन्ति।परं च यदान्यायोपरि एव अपराधिनः आक्रामयन्तितदाराष्ट्राय चिन्तायाः विषयोभवति। झारखण्डस्य धनवादस्य प्रकरणंभवतु वा उत्तरप्रदेशस्य फतेहपुरस्य आक्रामकंउपक्रमंउभौ एव विधानव्यवस्थायै शासन, प्रशासनाय आह्वानम् सिद्धयतः। कंचिद् अपराधिनं प्रतिभूः अप्रदाने, दण्डश्रावणेन वा न्यायाधीशं एव लक्ष्यीकृत्य प्राणघातकंआक्रमणंनिस्सन्देहे न शासनस्य सुदृढ़त्वेविधानतंत्रे च प्रश्नवाचकंभवति। यदान्यायमूर्तयः अस्मिन् लोकतंत्रे असुरक्षिताः भवन्ति तर्हि सामान्य जनानांकास्थितिः भविष्यतिइतिगम्भीरेणविचारणायाः विषयः अस्ति। एतादृशेसु प्रकरणे सुसम्यक् रूपेण न्यायः भवतु इदं सुनिश्चे तुंदायित्वं स्वयंन्यायपालिकया सहकार्य पालिकायाः विधायिकायाश्चापि अस्ति। लोक तंत्राणां स्तम्भान् सम्मिल्य न्यायः सुनिश्चितः कर्त्तव्यः। अपराधीनाम् दुस्साहसः चेत् इयत् सम्वर्द्धतेस्म तर्हि सम्यक् प्रक्रियया तान् समुचितं उत्तरम् प्राप्येत एव। अस्मद् व्यवस्थायै चिन्तनस्य अवसरोऽयं यत् किम् वयं अपराधिनं प्रति आवश्यकतायाः अधिकं सहानुभूतिं नैव प्रदेर्शयामः। आरोपी वाहन चालकाः पूर्वमेवकारागारे बन्दीकृताः अभवन्। कारागारगमानान्तरेऽपि अपराधिनः न शुद्धयन्ति। अत एव अपराधिनं समाजे उन्मुक्तं न मोचयेत्। विधानस्य उदारतायाः लाभः सामान्य जनेभ्यः प्राप्येत् न हिअपराधिनं। एतान् प्रतिकठोरतया दण्डस्य प्रावधानं कृत्वा आजीवनं कारागारे प्रक्षिपेत।

जयतु संस्कृतं जयतु भारतम्

अस्मिन् वर्षे बहुषु स्थानेषु संस्कृतदिवसस्य आयोजनम् अभवत् ।परस्परम् अपि संस्कृतेन सन्देशानाम् आदानप्रदानम् अभवत्। तत् तु शोभनम् ।
किन्तु भाषाभ्यासाय श्रवणम् आवश्यकम्। यत्र यत्र सन्दर्भः भवति तत्र तत्र आग्रहपूर्वकं संस्कृतं श्रोतव्यम्। आरम्भे अर्थाः स्पष्टाः न स्युः शनैःशनैः मस्तिष्कस्य रचना निर्मिता भवति तदा अर्थाःस्पष्टाःभविष्यन्ति। भाषायाः अभ्यासः सम्भाषणेन भवति। ये संसकृतं जानन्ति ते यदि संस्कृतेन वार्तालापं कुर्वन्ति तर्ह्िः द्विविध लाभः 1. स्वस्य भाषापरिष्कारः भवति 2. अन्येषां श्रवणाभ्यासः च भवति। तस्मात् संस्कृतेन सम्भाषणं कुरु जीवनस्य परिवर्तनं कुरु ।
भाषाभ्यासाय चत्वारि कौशलानि आवश्यकानि क्रमशः 1 श्रवणम् । 2 सम्भाषणम्। 3 पठनम् । 4 लेखनम् । इदानीं कौशलविकासस्य प्रारम्भः भवेत् । परस्पर सहयोगेन सर्वे मिलित्वा एतत् कार्यं वर्धयाम।
जयतु भारतम् ।

कालिकाष्टकम्



लहरसनाप्रियलम्बितदानवशोणितशोषणपारमिते
परमशिवोपरिशोभितपंकजपादमहामदसारगते ।
स्वगणशिवाशवकोटिगणावृतपाटितवर्वरमुण्डयुते
जय जय दक्षिणकालि कपालिनि भैरवसंगिनि शैलसुते 1
त्रिनयनरंजिनि कालविभञ्जिनि भोगविसर्जिनि योगरते
मधुमदगर्जिनि चण्डविमर्दिनि मुण्डविनाशिनि ताण्डविते ।
पशुबलिभोजिनि तान्त्रिकमज्जिनि मान्त्रिकपालिनि यन्त्रधृते
जय जय दक्षिणकालि कपालिनि भैरवसंगिनि शैलसुते 2
पितृवनचारिणि भूतविहारिणि नृत्यविलासिनि भृत्यरते
कुचतटशोभिनि रक्तविलोभिनि नक्तविहारिणि भक्तयुते
रुधिरविशोषिणि दानवरोषिणि मानवतारिणि मानयुते
जय जय दक्षिणकालि कपालिनि भैरवसंगिनि शैलसुते3
भवभयखण्डिनि खर्परधारिणि मुण्डविधारिणि दण्डयुते
कलिमलनाशिनि कृष्णकलामयि भस्मविलेपिनि शूलधृते ।
त्रिभुवनसुन्दरि भक्तगणेश्वरि दुष्टविमर्दिनि शिष्टनुते
जय जय दक्षिणकालि कपालिनि भैरवसंगिनि शैलसुते 4
कलाभ्राभां त्रिनेत्रां घनतिमिरनिभां भीषणास्यां महोग्रां
नीलारत्नैः सुदीप्तामभयवरकरां नीलशाटीं ज्वलन्तीम् ।
श्यामां चित्रां विचित्रां मरपुरगमनां मुक्तकेशीं पिबन्तीं
तां देवीं दिव्यमूर्तिं शिवशिवगृहिणीं कालिकामाश्रयामि5
कृष्णांगीमसिताम्बरां घनकुचां घोराट्टहासां परां
दिग्वस्त्रां वरदाभयां त्रिनयनां शिवां महाशाम्भवीम् ।
उन्मत्तां मदिराधरां स्मितमुखीं सिन्दूरविन्दूज्वलां
कल्याणीं रुधिराशनीं सुरुचिरां देवीं भजे कालिकाम् 6
जयतु जयतु काली कालकान्ता कपाली
जयतु जयतु खर्वा खड्गखट्वांगहस्ता ।
जयतु जयतु गोप्त्री गोपनीया वरेण्या
जयतु जयतु घोरा घोररूपा घटस्था 7
आवाहये तां परमां च मायां कालीं करालीं घननीलवर्णाम् ।
सूक्ष्मां विचित्रां नरमुण्डमालां घोराट्टहासां मुहुरानतोऽस्मि 8

नन्दप्रदीप्तकुमारः

प्रतीक्षा... भवता आहूयमाना संख्या परिधौ नास्ति...

सुजा के पी
जिविएस् एस् चर्प तृशिवपेरूर


'भवता आहूयमाना संख्या परिधौ नास्ति......। दिनद्वयतः पुत्रस्य दूरवाण्या इयमेव आयाति इति विषादपूर्णया वाचा सगद्गदं प्रलपन्ती शारदा मम वक्षसि मुखं निहितवती। किं वक्तव्यमिति ममापि भ्रान्तिः जाता। एक पुत्रः सुन्दरः गुणवान् च। बाल्ये सर्वे वदन्ति स्म यत् ' एतादृश पुत्रलाभार्थं तपः करणीयम् ' इति....। तस्य अष्टमजन्मवार्षिकस्य आचरणवेलायां मम मित्रं राधाकृष्ण एवमुक्तवान्' भवान् ग्रामीणविद्यवये पुत्रं पाठयित्व तस्य 'फ्यूच' किमर्थं नाशयति नगरम् आगच्छतु। तत्र उत्तम विद्यलये पाठयतु, प्रवेशन क्लेशः स्यात्। चिन्ता मास्तु, व्यवस्थां करिष्यामि वासव्यवस्थायामपि चिन्ता न करणीया 'किन्तु पितरौ' मम चिन्ता जाता। किं भो! इदानीं भवतः पुत्रस्य भविष्यमेव प्रधानं ननु? वासरान्तेषु अत्र आगत्य पित्रो क्षेमान्वेषणं कुरु ' तदेव उत्तममिति शारदायाः अपि मतमासीत। हरितमयानि क्षेत्राणि जीर्णमपि शान्तिपूर्वं मन्दिरं च त्यक्त्वा तथा सदा जपन्तम् अश्वत्थं विस्मृत्य अपरिचिते नगरे वासः। राम! राम! इति मातुः आह्वानं कदाचित् एव श्रृणुयाम्।समूलम् उत्पाट्य अन्यत्र रोपणम्। !! तत्र सामञ्जस्ये कति दिनानि आवश्यकानि भवेयुः । मम विविधाः चिन्ताः आसन्। किन्तु नगरी तु काचित् अभिसारिका इव। तस्याः करवलये बद्धः चेत् सर्वमपि विस्मरति। न गृहं , न ग्रामः न बान्धवाः । तस्याः सौन्दर्ये मुग्धः न किमपि स्मरन्ति...। मोहयितुं सा जानात्यपि......।

नगरजीवितम् आरब्धम् । ग्रामस्य व्ययात् दशगुणितः व्ययः । कदलीपत्रमपि धनेनैव लभ्यम्। तद्वत् अन्याः आवश्यकताः सञ्जाताः। 'सर्वेषु गृहेषु परिचारिकाः सन्ति। एका अत्रापि भवतु। नो चेत् अस्माकम् अपमानः' शारदायाः परिभवः । कथञ्चित् परिचारिकायाः व्यवस्थाम् अकरवम्। पुत्रस्य इच्छानां तु सीमा एव नासीत्। एकस्यानन्तरम् अन्यत्... । द्विचक्रिका, जङ्गमदूवाणी, सङ्गणकम्... एवमेवम् आवलिः प्रवृद्धा।' भवान् छात्रः खलु इदानीं किमर्थम् ' अपृच्छम् । पितः! सर्वेषां मम मित्राणां हस्ते अस्ति।भवान् कस्मिन् युगे जीवति 'प्रश्नभावेन शारदां दृष्टवान्। ददातु रे, तस्याः नेत्रे स्पष्टम् अवदताम। भवतु अस्माकम् उण्णिः खलु अनयस्मै कस्मै न इति विचचिन्त्य तामपि इच्छां पूरितवान्। सङ्गणकं गृहमानीतम् । उण्णिः तु सर्वदा तस्य पुरतः एव । पठनार्थमेव

कर्मन्यासप्रतिषेधः अपलपनीयो भवति वा नमो नमः

अस्य राष्ट्रस्य विकसनवेगं मन्दीकर्तुम् एव समर्थः आसीत् अखिलभारतीयकर्मरोधप्रतिषेधः। कोटिशः रूप्यकाणां नष्टम् एव राष्ट्राय अनेन सञ्जातम्। प्रतिषेधाय सर्वेषाम् अर्हता अस्ति। किन्तु सः राष्ट्रस्य अभिवृद्धिकर्मणि तालभङ्गं सृष्ट्वा न भवेत्। पुरोगमनचिन्तनानि वाचि इव कर्मणि अपि आचरितुं सर्वैः राजनैतिकदलैः प्रयतितव्यः। विनष्टं प्रभावं प्रत्यानेतुं प्रयत्नः एव स्वतन्त्रतालब्धेः आरभ्य भारतीयजनतत्या अनुष्टीयते। विभिन्नाः राजनैतिकविश्वासिनः विभिन्नाः धर्मानुयायिनः वा भवन्तु , क्रियमाणानि सकलानि प्रवर्तनानि राष्ट्रपुरोगतिं लक्ष्यीकृत्य भवितव्यानि। अतः एतादृशः कर्मरोधः निरर्थकः निराकरणीयश्च इति बोद्धव्यः।

उपयोगः इति तस्य वचने तु आवयोः संशयलेशोऽपि नासीत्। एकस्मिन्दिने दूरवाणी आगता। पुत्रस्य विद्यालयात् शीघ्रम् आगन्तव्यम् किं स्यात् एतावत्याः त्वरयाः कारणम् प्राचार्यस्य प्रकोष्ठं प्रविष्टः । क्रोधस्फुरनेत्राभ्यां किमपि लिखन् प्राचार्यः। समीपे निद्रामग्नः इव उण्णिः । प्राचार्यः वक्तुमारब्धवान् - पश्यतु भवतः पुत्रस्य पठनवस्तूनि .... उत्पीठिकां प्रदर्शितवान् रक्तवर्णेन अङ्कितं प्रगतिपत्रम्, श्वेतचूणर्युक्तानि लघुपलास्तिकपोटलिकाः , काचित् सान्द्रमुद्रिका..... एवमेवं ..... व्यक्तं किल? इदमपि पश्य , सान्द्रमुद्रिकां सङ्गणके संस्थाप्य सः चलचित्रं दर्शितवान् ..... मम अधस्तात् भूमिः चलिता इव पाताले मग्नः इव अभवम्। चित्रे मम पुत्रः परिचारिका च .... अहो किं किं दृष्टं मया .... मम शिरोभ्रमणं जातम्। प्रचार्यः पुनरपि कथयन्नासीत्। आरक्षकाः न्यायवादः अधिवक्ता एवमेवं...। उण्णिः गृहमानीतः। शारदा रोदितुमारभत। पुत्रस्य स्कन्धे स्ववक्षसि च पुनः पुनः ताडयन्ती सा किमपि प्रलपन्ती आसीत्। क्रुद्धः सः मां स्वमातरम् अपि ताडयितुम् उद्युक्तः।



प्रातिवेशिकस्य अध्यपकस्य साहाय्येन उन्मादविमुक्तक्रन्दं नीत्वा चिकित्सा .... वर्षाणां प्रयत्नेन सः मादकवस्तुभ्यः विमुक्तः । ' स्वकृतेभ्यः पापेभ्यः मोचनं प्राप्तुमिच्छामि । पापनिवारिणीनां तीर्थानां वक्षसि अश्रूणि मुञ्चन् पूतो भविष्यामि ...'आवयोः मौनम् अनुमतिं मत्वा सः प्रस्थितः .... मासद्वयं अतीतम्। एकवारं कावेर्यामस्मीति दूरवाणी आसीत। परन्तु ततः परं कापि वार्ता नास्ति। तम् आह्वयामश्चेत् परिधौ नास्तीति वचनमेव।
राम... ... राम....... जानकीजाने येशुदासस्य मधुरस्वनः । रामचन्द्रः झटिति स्वप्नात् जागरितः । दूरवाणी!! मह्यं दूरवाणी !! उण्णिः स्यात् । शारदा अपि दूरवाणीं स्वीकृतवान्। अपरस्मात् पार्श्वात् ध्वनिः आगतः। राम ! किमर्थं भवान् न आगच्छति ? श्वः जन्मदिनं तव ...... आयाहि। आवामत्र भवदागमनं प्रतीक्ष्यमाणौ स्वः । मातुः सकम्पवचनं श्रुत्वा किमपि स्मृत्वा इव रामचन्द्रः भायर्या सह झटित्येव गृहं प्रतिष्ठित । यात्रावेलायामपि शारदा पुत्रम् आह्वयितुं प्रयतमाना आसीत। तदापि सा एव वाणी...' भवता आहूयमाना संख्या परिधौ नास्ति '।

शिक्षाशास्त्रम्- शास्त्रमिदं वेदेङ्गेषु अन्यतमत्वेन प्रथितम

वैदिकानां शब्दानाम् उच्चारणमधिकृत्य प्रवृत्तं शास्त्रं भवति शिक्षाशास्त्रम। शास्त्रमिदं वेदेङ्गेषु अन्यतमत्वेन प्रथितम।
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।
इति पाणिनीयशिक्षागतश्लोकप्रामाण्येन षडपि वेदाङ्गानि वेदपुरुषस्य अवयवत्वेनाद्रीयन्ते चेत् शिक्षात्मकम् अङ्गं तत्र घ्राणस्वरूपमिति ज्ञातुं शक्यते।
शिक्षायायः घ्राणत्वप्रतिपादनेन तस्याः वेदेध्ययने अतीवावश्यकत्वम् अङ्गीक्रियते। यद्यपि व्याकणं शरीरस्थोच्चस्थानं मुखस्वरूपं भवति तथापि नासिकायाः मुखोपरि स्थित्या तत्स्थानपन्ना शिक्षैव सर्वोपरि वरीवर्ति। पदसाधुत्वमात्रविधायकं व्याकरणम् उच्चारणादिविधिविहीनं तत् नासिका विरहितं मुखमिव न शोभते इति शिक्षयाः वेदपुरुषनासिकात्वव्यवहारं सयुक्तिकं सम्पादयति।
स्वरवर्णाद्युच्चारणप्रकारो यत्र शास्त्रो शिक्ष्यते, उपदिश्यते सा शिक्षेति सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायामुक्तं दृश्यते। अनेनावगम्यते यत् येन शास्त्रेण वेदमन्त्रणाम् उच्चारणं शुद्धं सम्पाद्यते तच्छास्त्रं शिक्षाशास्त्रमिति। वेदे स्वरस्य प्राधान्यं तु सर्वविदितमेव। स्वरज्ञानं च शिक्षामूलकमेव। अत एवेदं शिक्षाशास्त्रं वेदाङ्गत्वेन कल्प्यते। मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्व्रजो यजमानं हिनस्ति।
यथेन्द्रशशत्रुसावरतोऽपराधात। इति शिक्षावचनं वेदमन्त्रणामुच्चारणे शिक्षाशास्त्रस्य प्राधान्यं प्रमाणयति।

आख्यायिकेयं प्रसिद्धा - विश्वरूपसंज्ञिते

त्वष्टुः पुत्रे इन्द्रेणापहृते सति रूष्टस्त्वष्टा इन्द्रस्य हन्तारं पुत्रमुत्पादयितुमाभिचारपूर्वकं कञ्चन यागं चकार। तत्र इन्द्रशत्रुवर्धस्व इति पदप्रयोगः तत्पुरुषसमासयुक्तः मन्त्रे ऊहितः। तस्मिन् मन्द्रे तत्पुरुषसमासोक्त अन्तोदात्तत्वे कर्तव्ये बहुव्रीहिप्रयुक्तः अद्युदात्तस्वरः ऋत्विजा प्रयुक्तः। अतः शब्दस्यार्थान्तराभिधानात् इन्द्रेण इन्द्रहननार्थं त्वष्टजनयितः वृत्रासुरोऽपि हतः। अतः मन्त्रेषु स्वरदोषो वर्णदोषो वा कथमपि न भवेदिति ज्ञायते। स्वरतः स्वरेण वर्णतः वर्णेन अक्षरेण वा हीनः रहितः मन्त्रः मिथ्या प्रयुक्तः सन् तमभीप्सितमर्थं नाह। सः मन्द्रः वाग्व्रचो भूत्वा यजमानं हिनस्ति हन्ति। यथा स्वरस्य अपराधात् इन्द्रः शत्रुः इति शब्दः यजमानं हिंसितवानिति शिक्षावचनस्य तात्पर्यम्।
अद्यत्वे नैके शिक्षाग्रन्थाः प्रकाशितत्वेन चोपलभ्यन्ते। बादरायणशिक्षा , पाणिनीयशिक्षा, नारदशिक्षा, कौडिन्यशिक्षा इत्येवमादयो ग्रन्थास्तत्र प्रमुखाः। शिक्षाग्रन्थेषु सर्वविदितं प्राशस्त्यं पाणिनीय शिक्षायेव आवहन्ति। यतो हि पाणिनीयं व्याकरणं न केवलं लौकिकमात्रम् अपि तु वैदिकानमपि शब्दानां साधुत्व कल्पकमेव। अतः पाणिनीयस्य लौकिकवैदिकेत्युभयविधव्याकरणस्य व्युत्पादकत्वेन तत्सम्बन्धा शिक्षा इतरशिक्षाग्रन्थेभ्यः प्रसिद्धिमलभत।
शिक्षाशास्त्रे प्रतिपाद्यतया बहवो विषयाः उपतिष्ठन्ते। तत्र वर्णानां भेदः उदात्तानुदातस्वरितभेदाः अनुनासिकानामनुनासिकाभेदाः ह्रस्वदीर्धप्लुतभेदाः वर्णोत्पत्तिः वर्णभेदानाम् उच्चारणस्थानानि वर्णनामाभ्यन्तर बाह्यप्रयत्नभेदाः इत्येते अंशाः मुख्यभूताः वर्णानां भेदाः- मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकः।
पाणिनीयशिक्षायां वर्णानां भेदमधिकृत्यैवमुच्यते
द्विषष्टिः चतुषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा
स्वराः विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।
अनुस्वारो विसर्गश्च ख फौ चापि पराश्रितौ
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च।। इति।
संस्कृतभाषायां स्वरः सन्ति एकविंशतिः । अ इ उ ऋ इत्येते चत्वारः वर्णाः ह्रस्वदीर्धप्लुतभेदात् द्वादश सन्ति। ए ऐ ओ औ इतीमे वर्णाः चत्वारः दीर्धप्लुत भेदात् अष्टौ तेषां ह्रस्वभावात। लृकारो ह्रस्वः एक एव इति मते लृकारः एक एव। संकलनया स्वरवर्णाः एकविंशतिर्जाता। ककारादरभ्य मकारपर्यन्तं स्पर्शाख्या पञ्चविंशति वर्णाः सन्ति।
यमसंज्ञकाः चत्वारः वर्णाः प्रातिशाख्ये प्रसिद्धाः। वर्गेषु अद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशाः वर्णाः यमाख्याः। अनुस्वारविसर्गौ इति द्वौ। क फ इति कफाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ द्वौ।
द्वयोर्स्वरयोरध्ये वर्तमानः लकारः दुःस्पृष्टाख्यः। अन्यः एकः इति आहत्य त्रिषष्टिः वर्णाः संस्कृतभाषायाम् विद्यन्ते इति पक्षे चतुःषष्टि वर्णाः बोध्याः भाषायाम्। लृकारस्य प्लुतभेदे प्लुतलृकारोऽपि पृथक् वर्णः शिक्षायाम् अच् वर्णानाम् उदात्त अनुदात्त स्वरित अशुनासिक अननुनासिकधर्माः अपि उच्यन्ते। ताल्वादिषु उच्चारण स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसंज्ञः। आये मित्रावरुणा इत्यृचि अकारः एकारश्च उदात्तः। तल्वादिषु उच्चारणस्थानेषु अधोभागे निष्पन्नः अजनुदात्तसंज्ञः स्यात्। अर्वाङ् यज्ञसंक्राम इत्यृचि आद्यः अकारः अनुदात्तः। उदात्तत्वानुदात्तरूपवर्णधर्मौ यस्मान्नचि विद्येते सः अच् स्वरितसंज्ञो भवति।
मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकः केवलं मुखेनैवोच्चार्यमाणो वर्णः अनुनासिकसंज्ञः इति अनुनासिकाननुनासिकयोर्भेदः। वर्णानां ह्रस्व दीर्ध प्लुतभेदे तादृशानां वर्णानाम् उच्चारणकाल एव निमितभूतो भवति। एकया मात्रया उच्चार्यमाणो वर्णः ह्रस्वः , द्विमात्रकालिको वर्णः दीर्धः, त्रिभिः मात्ररूपकालैः उच्चिर्यमाणो वर्णः प्लुतसंज्ञकः इति तत्र विवेकः।

वर्णोत्पत्तिक्रमः - शिक्षायां वर्णोत्पत्तिमेवमाह -

आत्मा बुद्ध्या समेत्यर्थान् मनो भुङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
सोत्तीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णाञ्जनयते
तेषां विभागः पञ्चधा स्मृतः । इति आत्मा संस्काररूपेण स्वागतान् घटपटादि पदार्थान् स्ववृत्त्या एकबुद्धिविषयान् कृत्वा स्वस्मिन् संस्काररूपेण स्थितपदार्थबोधनेच्छया मनः स्वस्यैव परिणामविशेषं युक्तं करोति। तदनु मनः जठराग्निम् अभिहन्ति। सः जठराग्निः जठरस्य वायुम् ऊर्ध्वं गन्तुं प्ररयति। यदा कायाग्निना प्रेरितः वायुः ऊर्ध्वदेशं संप्राप्य वर्णोच्चारणस्थानानि स्पृशति , तदा तत्तद्वर्णाः मुखान्निस्सरान्ति। वर्णानामुच्चारणस्थानानि अष्टौ स्थानानिवर्णानामुरः कण्ठः शिरस्था। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च। वर्णानामुच्चरणस्थानानि शिक्षायमेवमुच्यते।
अकारस्य कवर्गस्य हकारविसगर्योश्च उच्चारणस्थानं कण्ठो भवति। इकारस्य चवर्गस्य यकारशकारयोश्च उच्चारणस्थानं तालुर्भवति । ऋकारस्य टवर्गस्य रेफषकारयोः च उच्चारणस्थानं दन्ताः भवन्ति ।
उपूपध्मानीयानां ओष्ठौ भवतः। ञ्मणङणनानां नसिका च स्थानत्वेन प्रख्यायते । एकार ऐकारौ कण्ठतालुस्थानीयौ, वकारस्य दन्तोष्ठम्। जिह्वामुलीयस्य जिह्वामूलं नासिका अनुस्वारस्य स्थानं भवति। एवं शिक्षायां वर्णोच्चारणस्थानानि स्पष्टमुक्तानि । शिक्षाशास्त्रस्य अध्ययनमद्यत्वेऽपि जनेभ्यः अत्यन्तम् उपकुरुत एव । यतो हि प्रादेशिकभाषासु उपयुज्यमानेषु शब्देषु इमे एव वर्णाः आदृताः । परन्तु इदानीं विद्यलयेषु वर्णानाम् अध्यापनाध्ययनव्यवस्था आधिक्येन प्रमादान्विता भवति । अत एव तद्वणर्युक्तानां शब्दानामुच्चारणमपि त्रुटिं गच्छन्ति। छात्राः महाप्रणान् वर्णान् अल्पप्राणत्वेन अल्पप्राणान् वर्णान् महाप्राणत्वेन वा उच्चारयन्ति । नो चेत् तान् तथा उच्चारयितुम् अध्यापकाः प्ररयन्ति च। किन्तु शिक्षाशास्त्रस्य अध्ययनेन इयं रीतिः परिवर्तमानयोग्य इव भवति।

निरुक्तम्- निरुक्तमिति नाम्ना प्रथितं शास्त्रं वेदाङ्गेष्वन्यतमं भवति। छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।। इति शिक्षाग्रन्थवचनेन षडपि वेदाङ्गानि वेदपुरुषस्य अवयवत्वेन प्रकल्प्यन्ते। तत्र निरुक्तात्मकमङ्गं वेदपुरुषस्य श्रोत्रत्वेन गण्यते। श्रोत्रं नाम कर्णः । शब्दानां श्रवणद्वारे तदर्थज्ञानं श्रोत्रेणैव अस्माकं सम्भवति। यथा श्रोत्रमन्तरेण शब्दानां श्रवणं तेषामर्थमवगमश्च असम्भव एव, तथा वैदिकानां शब्दानाम् अर्थज्ञानमपि निरुक्तादृते असाध्यमेव। अत एव निरुक्तरूपं शास्त्रंवेदपुरुषस्य श्रोत्रत्वेन निर्णीयते। किञ्च शास्त्रस्यास्य अध्ययनेन ब्रह्मलोकप्राप्तिरपि सेत्स्यतीति शिक्षावचनमिदं शास्त्रमेतद् अधिजिघांसमानन् स्मारयति।


निरुक्तशब्दव्युत्पत्तिः- निरुच्यन्ते निश्शेषेण उपदिश्यन्ते वैदिकाः शब्दाः तदर्थावबोधनाय यत्र तन्निरुक्तमिति निरुक्तशब्दस्य व्युत्पत्तिः। वेदे विद्यमानानाम् अर्थकथनापेक्षायुक्तानां शब्दानां सङ्कलनं तावत् निघण्डुः इति नाम्ना प्रथिते वैदिके कोशे कृतमस्ति। तस्य भाष्यत्वेन नो चेत्क टीकारूपतावेन वा विरचितः ग्रन्थो भवति निरुक्तम्। निघण्डौ तु केचन वैदिकाः शब्दाः परिगणिता एव। निरुक्ते तावत् तेषां शब्दानां सविस्तरं विवेचनं क्रियते। अर्थात् प्रकृति प्रत्ययविभागानुसारेण अर्थज्ञानाय प्रक्रिया वर्णिता अस्ति। अर्थावबोधे निरपेक्षतया पदज्ञानं यत्रोक्तं तन्निरुक्तमिति ऋग्वेदभष्यभूमिकायां सायणाचर्यः निरुक्तं निर्वक्ति । किञ्च एकैकस्य पदस्य सम्भाविताः अवयवार्थाः यत्र निश्शेषेण उच्यन्ते तदपि निरुक्तमित्यपि केचन निरुक्तशब्दमाचक्षते।

यास्कस्य कालः- यास्कस्य कालस्थानयो र्विषये विदुषां मते यास्कस्य कालः प्रायः क्रिस्तोः पूर्व? सप्तमशदाब्दिः (700 क्रि. पू.) इति कल्प्यते। यास्कः पाणिनोः प्राच्यो भवतीति ऐतिहासिकानां मतम्। यतो हि तदीयसिद्धान्ताः पाणिनिनापि स्वीकृताः। यास्कस्य निरुक्तस्यान्ते पारस्कर इति नाम विद्यते । तेन विद्वंसः ऊहन्ते यत् सः पारस्कदाशीय इति। तस्य गोत्रस्य नाम भवति यास्क इति गोत्रनाम्नैव सः संप्रत्यपि अभिधीयते।

निघण्टुः निरुक्तञ्च - यास्केन परिष्कृते निघण्टुग्रन्थे शब्दाः सङ्ग्रहीताः सन्ति। ते शब्दाः अध्यायपञ्चके विभक्ताः। गवादिदेवपत्न्यन्ताः वैदिकाः शब्दाः तत्रोक्ताः । तेषां शब्दानां निरुक्तिः द्वादशाध्याय युक्ते निरुक्तग्रन्थे यास्केन कृता । तत्र परिशिष्टत्वेन अध्यायद्वयमपि योजितमस्ति। एवञ्च आहत्य चतुर्दशाध्यायाः निरुक्ताख्ये ग्रन्थेस्मिन् दृश्यन्ते। अस्य ग्रन्थस्य विषये यास्कः स्वयमेव वदतीत्थम्- समाम्नायः समाम्नातः सः व्यख्यातव्यः इति । अर्थात् अस्मिन् ग्रन्थे निघण्टौ आम्नाय शब्दाः एव समाहृताः तेषां विवरणमत्र क्रियते इति। उदाहरणतया स्वर्गपर्यायस्य नाकः इति शब्दस्य व्युत्पत्तिः निरुक्तकारेण एवं प्रदर्शिता - कै शब्दे इत्यस्मत्द्धतोः कायन्ति, आनन्दोत्सवध्वनिं कुर्वन्ति यस्मिन्नित्यर्थे कमिति शब्दः सुखार्थे निष्पादित न कं अकमिति सुखविरोधि दुःखमित्यस्मिन्नर्थे बहुव्रीहिमाश्रित्य नलोपं अकृत्वा सवर्णदीर्धे च नाकः इति शब्दः व्युत्पद्यते। दुखेन अमिश्रितं सुखं यत्रोपलभ्यते सः नाकः स्वर्गः इति नाकशब्दार्थः।

निरुक्तकाराणां मौलिकाः सिद्धान्ताः- निरुक्तकारः यास्कः समानपि शब्दान् नाम आख्यात उपसर्ग निपातत्वेन चतुर्था विभजते। तत्र नामाख्यातयोः वाचकत्वरूपमर्थम् उपसर्गनिपातानान्तु द्योतकत्व रूपमर्थमपि अकल्पयत्। भाव प्रधानमाख्यात मित्यनेन वाक्येषु तिङन्तानां प्राधान्यं, धातुलभ्यव्यापारर्थस्य विशेष्यत्वं व्यापार मुख्यविशेष्यक शाब्दबोधकथन प्रकारोनपि तैः स्वीकृतः। इमामेव सरणीं वैयाकरणाः अपि अनुवर्तन्ते। सत्वप्रधानानि नामानि इत्युक्त्वा नामासु द्रव्यस्य प्राधान्यञ्च निर्णीतम्। शब्दाः रूढियोगिक- योगरूढ भेदेन त्रिधा विभक्ताः
येषां शब्दानां प्रकृतिप्रत्ययरूपव्याकरणप्रकियां विना अर्थात् अवयवार्थं विना साक्षात् अर्थकथनेन प्रयोगो विहितः, ते योगरूढशब्दाः इत्युच्यन्ते। स्तम्भादयः शब्दाः तत्र उदाहृताः। ये च तावत् प्रकृति प्रत्ययविभागपरत्वेन निष्पाद्य कस्मिंश्चिदर्थे रूढाः भवन्ति ते रूढिशब्दाः इत्युच्यन्ते। पङ्कजादिशब्दास्तत्र लक्ष्यन्ते। पङ्कात् जायते इति अर्थकथनपुरःस्सरं पङ्कात् इत्युपपदपूर्वकात् जनि प्रादुर्भावे इत्यस्माद्धातोः डप्रत्यये कृते पङ्कजशब्दः कमलरूपार्थे व्युत्पद्यते। तत्रावयवार्थे सत्यपि कृमिकीटादिषु पङ्कजशब्दो न प्रवर्तते। अवयवार्थसहकृतरूढ्यर्थः एव अत्र आश्रीयते। नतु अवयवार्थ एव। एषां शब्दानां प्रकृति प्रत्ययरूप विभागपरकत्वेन अर्थकथनं दृश्यते ते शब्दाः यौगिकाः इत्युच्यन्ते। तेषां तु अवयवार्थ एव स्वीक्रियते। पाचकादयः शब्दास्तत्रोपतिष्ठन्ते। अत्र पाककर्ता इत्यवयवार्थ एव आश्रियते। न तु चेदपि सर्वाणि नामानि आख्यातजानि (धातुजानि) इति प्रकृतिप्रत्ययविभागपरत्वेन अर्थकथनयोग्याः इत्येव निरुक्तकाराणां समयः। किन्तु गार्ग्यदयः विमतिं प्रदर्शयन्ति। एवं सति निरुक्तकाराणामेव मतं समीचीनमिति निरुक्ते सयुक्तिकं निरूपितम्।

अमृतवाणी गीतातत्वार्थबोधः।।



शत्रुघ्नश्रीनिवासाचार्यः पण्डित शम्भुनाथ शास्त्री वेदान्ती भागलपुर, (बिहार)

।। ब्रह्मलीनानां वेदर्षीणां श्रीमतामायुर्वेदबृहस्पति-
सारस्वतानां श्रीमद्भगवद्गीताममर्मज्ञानां,
श्रीमद्भागवतप्रवक्तानां,प्रकृति तत्त्व मीमांसक
महापुरुषाणाञ्च सरस्वतिपुत्राणां महाभागानां
चिरञ्जीवी सुपुत्रः क्षिप्रातटेऽवस्थितोज्जैनमहानगरस्य
वास्तव्यः स पण्डितः डॉ.
तेजप्रकाशव्यासमहाभागः ।।
ज्ञानविज्ञानतत्त्वज्ञो गीतातत्त्वविचारकः।
आयुर्विद्याबलं यस्य
व्यासस्तेजप्रकाशकः।।1।।
पूर्णानन्दो महायोगी
व्यासः सारस्वतो मुनिः।
तेजप्रकाशदिव्यात्मा।
तस्य पुत्रो हि तत्त्वविद्।।2।।व्यासो
व्यापककार्यत्वाज्
जनानां हितकारकः ।
लोकसेवारतो नित्यं
तस्मै तेजसे वै नमः।।3।।
माधुर्येण हि यो युक्तः
सौम्यचित्तः स्वभावतः।
नाम्ना तेजप्रकाशो हि
व्यासस्साधुः सदा सुखी। ।4।।
वैदुष्यं भूषणं यस्य
वैचक्षण्यं तथैव च ।
प्रकृतिसेवको यस्स
श्रीव्यासाय नमो नमः।।5।।
विद्यादानतपोयुक्तो
ज्ञानशीलसमन्वितः ।
गीताप्रचारकोऽयं हि
सत्यधर्मसनातनी ।।6।।
निपुणः पत्रकारेषु
लेखकेषु सदा वरः ।
वीणापाणेः सुपुत्रोऽयं
तेजप्रकाशपण्डितः ।।7।।
इन्दौरमण्डलं धन्यं
धन्यो मध्यप्रदेशकः ।
धन्याश्च पाठका एते
धन्या नः सुरभारती ।।8।।

।।गीतोपनिषद् ज्ञानामृतं।।



गीताज्ञान संचरण समितिः, पटना, विहार, अध्यक्षः डॉक्टर सुदर्शन श्रीनिवास शाण्डिल्यः



।। तमाहुः पण्डितं बुधाः ।।
गीताज्ञानं सर्वोत्तमं परमं निश्चितं समेषामात्मकल्याणकरं। ।
अस्मिन् ज्ञाने सन्देहलेशोऽपि दुर्लभः। अखिलविश्वक्षेमकरं ज्ञानं।।
प्रत्येकं श्लोके एव आत्मकल्याणाय संकेतः स्यन्दते। ।विश्वासपूर्वकं संकेतोऽनुपालनीयः। ।
गीताज्ञानं
अध्यायः 4 श्लोकसं19
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डिताः बुधाः। ।
यस्य कर्मणः आरम्भः कामनारहितः यस्य सर्वाणि कर्माणि ज्ञानाग्नौ दग्धानि अर्थात् फलबन्धनरहितानि सन्ति। तं श्रेष्ठपुरुषं विवेकिनः शास्त्रिणः पण्डितं आमनन्ति। कस्यापि कर्मणः कर्तृत्वाहंकारो न भवेत् । अहंकारः सदैव स्वोपलब्धिं वर्णयति विचार्यतां क्षणभंगुरदेहस्य कोऽहंकारः? अहंकारः न कदापि कर्तव्यः। एषः महामानसिकः रोगः। सर्वाणि साधनानि परमात्मनः। अयं देहोऽपि तस्यैव तर्हि कस्याहंकारः अहंकारश्चेत् तदेयंमहतीमहाजडता। अहंकारं मन्यमानाः सव रावणादयो विनाशं प्रापुः।तेषां कथां जानन्ति हि सर्वे। ।
स्वयं रावणस्य विदुषी धर्मपरायणा भार्या मन्दोदरी विलपति
।। रामचरितमानसे।।
रामविमुख अस हाल तुम्हारा।।
रहा न कुल कोऊ रोवन हारा।।
अतः सर्वैः निरंकारपूर्वकं प्रभोः प्रसन्नतायै जगतः कल्याणाय च कर्म कर्तव्यम्।।

॥ विमलः हिन्दी भावानुवादः ॥

गीता के चतुर्थ अध्याय के 19 श्लोक में सुस्पष्ट पण्डित का स्वरूप दिग्दर्शन है। यह आन्तरिक परिचय है। जो कर्म करते हुए भी किञ्चिन्मात्र कर्म में लिप्त न होकर तत्परता से सम्पूर्ण आत्म निष्ठा से विश्व कल्याण तथा परम पिता विश्वात्मा की प्रीति केलिए सम्पूर्ण कर्म करता है वही वास्तविक पण्डित है। जो बाह्य रूप से कर्म स्वरुप का त्यागकर परमात्मा में संलग्न है उसे पहचानना सरल सुगम है,परन्तु जो कर्म करते हुए भी आसक्ति रहित कामना रहित मात्र कल्याण केलिए निष्ठा से कर्म कर रहा उसका परिचय दुर्लभ है। क्योकि उनका परिचय आन्तरिक प्रच्छन्न है। ऐसा वह गृहस्थ है, जो वाह्य वेश भूषा से त्यागी व्यवहृत नहीं है ,जो अपने को त्यागी भी नहीं मानता है पर कामना रहित कर्म कर रहा है। इन्हें पहचानना वास्तविक बुद्धिमत्तापूर्ण व्यवहार है।गीता वस्तुतः गृहस्थ आश्रम केलिए ही है। । बाहर से ब्रह्मचारी भीतर से विषयासक्त को गीता में मिथ्याचारी कहा गया है।मूढात्मा कहा गया है। जहां भी हों जिस परिस्थिति में हों वही सत्यता को स्वीकार करते हुए आभ्यंतरिक स्थिति में वैराग्य का संचार करते परमात्मा के शरणागत हो जीवन यापन की प्रेरणा मां गीता देती है। अहंकार का जहाँ अस्तित्व न होना चाहिए। ।।

।गीताज्ञान संचरण। ।

डॉ तेजप्रकाश पूर्णा नन्द महोदयस्य वृत्तम् : वसुधैव कुटुंबस्य महामानवः



डा.शिवानी शर्मा, जयन्तीपुरम्, हरियाणाराज्यम् ।

गोबलग्रीनसम्मानः प्राप्तो येन बुधेन वै ।
वसुन्धरासुतोऽयं हि सेवायां च रतस्सदा ।।1।।
तं विद्यावारिधिं प्राप्य प्रसिद्धश्च महानसौ ।
श्रीप्राचार्यपदत्वेन चालङ्कृतो बभूव ह ।।2।।
उद्यानं स्थापितं येन प्रकृतिं रक्षणाय च ।
यो वृक्षारोपणार्थं हि ग्रामं ग्रामं जगाम ह ।।3।।
मातृपितृजनानां यो दृढभक्तस्सदा हि च ।
येन संस्थापिता गेहे तेषां स्मृतौ सुवाटिका ।।4।।
देशेषु यो विदेशेषु सुविज्ञः प्रकृतेर्यथा ।
भवेत्सुजीवनं सर्वं स जनप्रेरकस्तथा ।।5।।
कथं भवेच्च वै लोके जीवनस्य प्रबन्धनम् ।
प्रेरयति च यो सर्वान् प्रबुद्धोऽयं विचारकः ।।6।।
सुखदुःखे समे भूत्वा मनः समं भवेद्यदि ।
स्थितप्रज्ञस्सदैवं स तिष्ठति मानवस्सदा ।।7।।
योगचिकित्सकश्चैव शिविरायोजकस्तथा ।
नारीसंरक्षणायैव कटिबद्धो महोदयः ।।8।।
समाचारस्य पत्राणां पत्रकारश्च लेखकः ।
संस्कृतस्य सदा प्रेमी सरस्वतीसुतो महान्।।9।।
अहिंसा करुणा प्रेम परोपकारभावना ।
वर्तन्ते हि गुणा सर्वे तेजस्मिंश्च महोदये ।।10।।
शास्त्राणामनुरागी यो वेदानां परिपालकः ।
गीतातत्त्वं सुबोधाय यो भाष्यलेखने रतः ।।11।।
धन्यस्तेजप्रकाशोऽयं धन्यौ च पितरौ सदा ।
धन्या जाता शिवानीयं चरितं लिखितं यया ।।12।।
(अनुष्टुप्छन्दः)

सुरभारती-भजनम्- तव पादयोः प्रणतिः

सुरभारति हे
तव पादयोः प्रणतिः
गायामि ते नाम गच्छामि ते
धाम सदा भवतु ते युतिः
तव पादयोः प्रणतिः
सुर-(ध्रुवम्)
कोमलवाचने शान्तिरसधारा
दर्शने विपुलकान्तिः
पठने पाठने स्मरणे कीर्तने
विराजते शिवशक्तिः
लोकभाषा भव सारदे सरले
त्वयि सदा अनुरक्तिः ।



सुर- 1
अभिन्नसुन्दर-दिव्यशब्दराशि-
रनन्तकोटिभाण्डारः
शिवसूत्रमयी कालिदासगीति-
परिपूर्णपारावारः

वाल्मीकि-कोकिल-कविता-
सुन्दरी-रमणे भाति सुकीर्तिः
तव पादयोः प्रणतिः
सुर - 2
वैज्ञानिकी भाषा प्रवहमाना या
निगम-आगमपुरी
पुराणपुरुषी सर्वाङ्गसुन्दरी
संस्कृत-सुषमा-सौरी
भारतभूषणा चिरसुखदात्री
भागवती ज्योतिष्मती
सुर -3

नन्दप्रदीप्तकुमारः

शिव स्तोत्रम् -शिव अनंत शक्ति विश्व दीप्ति सत्य सुन्दरम्

डॉ उदयभानु तिवारी'' (जबलपुर)

शिव अनंत शक्ति विश्व दीप्ति सत्य सुन्दरम्
प्रसीद मे प्रभो अनादि देव जीवितेश्वरम्

अर्थः- हे विश्व के प्रकाश,सत्य और सुन्दर स्वरूप, अनंत शक्ति,अनादि देव सबके प्राणेश्वर प्रभो शिव मुझ पर प्रसन्न होइये ।

श्लोक :- नमो नमो सदा शिवं पिनाकपाणि
शंकरम् जटासु मध्य जान्हवी झरर्झरति सुनिर्झरम्
भाल चन्द्र स्थितं भुजंग माल शोभितम्
नमोस्तु ब्रम्हरूप भूतभावनम महेश्वरम् ।

अर्थः- नमस्कार है, नमस्कार है, हे पिनाक धनुष धारण करने वाले शिव ,जिनकी जटाओं के बीच से पावन
गंगा जी झर झर कर निरंतर झर रही है ,जिनके भाल में चन्द्र और गले में सर्पों की माला शोभायमान हो रही है, ऐसे ब्रम्हरूप ,सम्पूर्ण भूतों (चर, अचर व पदार्थों) के उत्पन्न करने वाले महेश्वर शिव को
नमस्कार है ।



श्लोक :-कराल काल कंटकं
कृपालु सुर मुनीन्द्रकम् ललाट
अक्ष धारकं प्रभो त्रिलोक
नायकम् परंतपं शिवम् शुभम् निरंक नित्य चितनम्
नमोस्तु विश्वरूप भूत भावनम् महेश्वरम्

अर्थ :- कराल काल के कंटक,देवताओं और मुनियों पर कृपा करने वाले ,ललाट में तीसरा नेत्र धारण करने वाले,तीनों लोकों के स्वामी, परम तपस्वी,
शुभ ,जो निराकार के ध्यान में रत हैं ऐसे विश्वरूप चर,अचर भूतों कोउत्पन्न करने वाले महेश्वर शिव को नमस्कार है।

श्लोक :- महाश्वनं मृडोनटं त्रिशूलधर
अरिन्दमम् महायशं जलेश्वरं वसुश्रुवा
धनागमम् निरामयं निरंजनं महाधनं सनातनम्
नमोस्तु वेदरूप भूतभावनम् महेश्वरम् ।

अर्थ :- डमरू का गंभीर नाद करने वाले ,ताण्डव कारी, त्रिशूल धारण करने वाले ,शत्रुओं का नाश करने वाले ,महा यशस्वी ,जल के स्वामी ,यशरूपी धन से सम्पन्न,धन की प्राप्ति कराने वाले,रोग रहित निर्मल ,अपरिमित एश्वर्य वाले ,नित्य स्वरूप वेदरूप, चर ,अचर भूतों को उत्पन्न करने वाले
महेश्वर शिव को नमस्कार है ।

श्लोक :- कनकप्रभं दुराधरम् देवाधिदेव
अव्ययम् परावरं प्रभंजनं वरेण्य छिन्न संशयम्
अमृतपं अजितप्रियं उन्नघं अद्रयालयम् नमोस्तु
नीलकन्ठ भूतभावनम् महेश्वरम् ।

अर्थ :- स्वर्ण के सामान कान्तिवाले ,अजितेन्द्रिय पुरुषोंद्वारा जिनकी आराधना अत्यंत कठिन है,देवों के भी देव ,अविनाशी ,कारण और कार्य रूप ,वायु स्वरूप ,वरण योग्य, संशयों का हरण करने वाले,समाधि के द्वारा स्वरूप भूत अमृत पान करने वाले, भगवान् विष्णु के प्रेमी ,बंधन रहित,कैलाश और मन्दर आदि पर्वतों पर निवास करने वाले नीलकंठ, सम्पूर्ण चर ,अचर भूतों के उत्पन्न करने वाले महेश्वर शिव को नमस्कार है ।

श्लोक :- परात्परं प्रभाकरं तमोहरं त्र्यम्बकं
महाधिपं निरान्तकं स्तव्य कीर्ति भूषणं
अनामयं मनोजवं चतुर्भुजं त्रिलोचनं
नमोस्तु सोमरूप भूतभावनम् महेश्वरम् ।

अर्थ :- कारण के भी कारण , सूर्यरूप अन्धकार को दूर करने वाले , त्रिनेत्रधारी,महेश्वर ,निर्भय ,स्तुति करने योग्य उत्तम यश से विभूषित ,रोग ,शोक से रहित ,मन के समान वेगशाली चतुर्भुजी ,सूर्य, चन्द्रमा और अग्निरूप तीन नेत्रों वाले,सोमरूप चर, अचर ,भूतों को उत्पन्न करने वाले महेश्वर शिव को नमस्कार है ।

श्लोक :- स्तुत्य आम्नाय शम्भु शम्बरं परं
शुभम् महाहदं पादाम्बुजं रतिस्तुमम् प्रतिक्षणम्
विद्वतं विरोचनं परावरग्य सिद्धिदम्
नमोस्तु शूक्ष्मरूप भूतभावनम् महेश्वरम् ।

अर्थ :- स्तुतियोग्य ,वेद स्वरूप,कल्याणकारी परमानंद के महासरोवर शम्भु के श्री चरणों में मेरी प्रीति निरंतर बनी रहे, विद्वानों में श्रेष्ठ विविध प्रकार से प्रकाश फैलाने वाले ,एवं कारण और कार्य के ज्ञाता, सिद्धि प्रदाता, शूक्ष्मरूप, चर, अचरभूतोंको उत्पन्न करने वाले महेश्वर शिव को नमस्कार है ।

॥ भारतराष्ट्रे षोडशसंस्काराः॥

संस्कारशब्दः सम् उपसर्गपूर्वकः 'कृञ' धातुना प्रत्ययपूर्वकः अस्ति। संस्कारशब्दस्य व्युत्पत्तिः। संस्कारशब्दस्य प्रयोगः बहुधा भवति। मीमांसादर्शने अस्य संस्कारशब्दस्य अर्थः यज्ञाङ्गभूत पुरोडाशादि शुद्ध्यर्थं प्रोक्षणविक्षणादिना सम्पन्ना भवति । अद्वैतवेदान्तमतानुसारेण शारीरिकक्रियाणां मिथ्याक्षेपः संस्कारः इति। अभिव्यक्तिहेतुना आत्मव्यञ्जकशक्तिः संस्कारः कथ्यते इति नैय्यायिकाः। मानवजीवने संस्काराः महत्त्वपूर्णाः सन्ति। संस्कारैः मनुष्यत्वं, मानवता, व्यक्तित्वविकासश्च भवति। विभिन्नेषु ग्रन्थेषु संस्काराणां संख्या भिन्ना-भिन्ना दर्शिता वर्तते। जन्मना मानवः अपूर्णः भवति। संस्कारैः तत्र पूर्णता आयाति। भारतीयग्रन्थपरम्परायां प्रायः षोडशसंस्काराः करणीयाः इति भगवान् बादरायणः सूचयति, ते च इत्थं सन्ति -

1 गर्भाधानसंस्कारः

सृष्ट्यां मानवः सर्वोत्कृष्टो मन्यते। तस्य जीवनस्य उद्देश्यम् आत्मसाक्षात्कारो वर्तते। विधिपूर्वकं संस्कृतो मानवो दिव्यज्ञानमर्जयित्वा आत्मसाक्षात्कारं कर्तुं प्रभवति। मानवस्य सम्पूर्णजीवनं संस्काराणां क्षेत्रं वर्तते। संस्काराणां प्रमुखं लक्ष्यं शरीरस्य शुद्धिः पवित्रता चास्ति। एते संस्कारा वस्तुतः गर्भस्याधानादेव प्रारभन्ते। अधिकांशगृह्यसूत्राणि गर्भाधानादेव संस्काराणां प्रारम्भं निर्दिशन्ति। प्रजननमपि मानवजीवनस्य अङ्गभूतम्। धर्मशास्त्रानुसारम् अत्र काऽप्यशुचिता नास्ति। अस्मिन् विषये मनुराह –

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यं शरीरसंस्कारः पावनः प्रेत्य चेह च ॥

अस्यायमर्थो यद् वेदमूलत्वात् वैदिकैः पुण्यैः शुभैः मन्त्रप्रयोगादिभिः कर्मभिः द्विजातीनां गर्भाधानादि शरीरसंस्कारः कर्तव्यः। यतोहि एष शरीरसंस्कारो न केवलम् इहलोके परलोके चापि पुनाति। एवम् उक्तप्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः पापं शमं याति। गर्भाधानं परिभाषमाणो जैमिनिराह –गर्भः सन्धार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थं कर्मनामधेयम्। शौनकोऽपि प्रत्यपादयत् यत् यस्मिन् कर्मणि पुरुषेण निषिक्तो गर्भः स्त्रियां धार्यते तत् गर्भालम्भनं गर्भाधानं इत्युच्यते –

निषिक्तो यत्प्रयोगेण गर्भः सन्धार्यते स्त्रिया।
तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः॥

मनुयाज्ञवल्क्यादयः आचार्याः इदमेव कर्म ''निषेक'' इत्यभ्यदधुः

2 पुंसवनसंस्कारः

गर्भधारणानन्तरं गर्भस्थशिशोः पुंसत्वं सम्पादनहेतोः पुंसवननाम्नः संस्कारः भवति। अत्र विभिन्नदेवानां प्रार्थना भवति। यया प्रार्थनया गर्भस्थशिशुः पुष्टो भूत्वा पुत्ररूपेणप्राप्तो भवेत्। अस्मिन् अवसरे आयुर्वैदिकौषधीनां सेवनं, भगवतः विष्णोः पूजनं च कर्तव्यम्। येन कर्मणा पुमान् सूयते तत् पुंसवनम्। गर्भाधानस्य द्वितीये तृतीये वा मासे पुष्यनक्षत्रयुक्तायां तिथौ पुंसवनकर्म क्रियते। पुत्रजननिमित्तं संस्कारः क्रियते। होमः औषधिसेवनञ्च परिपाल्यते।

3 सीमन्तोन्नयनसंस्कारः

गृह्यसूत्रानुसारेण गर्भधारणानन्तरं चतुर्थे पञ्चमे वा मासे सीमन्तोन्नयनसंस्कारः भवति। अत्रावसरे पतिपत्न्योः केशानां प्रसाधनं वा संवर्धनं च करणीयम्। तयोः कृते उत्सवरूपोयं संस्कारः। अत्र संस्कारः, नृत्यं, गानं, वादनम् इत्यादि भवति । पत्न्याः मनोरञ्जनार्थं सोमस्य स्तुतिः भवति। यदा चन्द्रः पुरुषवाचकनक्षत्रेण युक्तः भवति तदा एव एषः संस्कारः भवति। सीमन्तम् उन्नियते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम्। स्मृतिग्रन्थानुसारेण षष्ठे अष्टमे वा मासे संस्कारोऽयमनुष्ठीयते। त्रिभिः दर्भपिञ्जुलैः गर्भिण्याः सीमन्तं (केशम्) उर्ध्व विनयति स्वामी। गर्भरक्षणमस्य प्रयोजनम्। केशस्य विभजनद्वारा जातशिशोः यशः त्रिलोकं व्याप्नुयात् इति भावः।

4 जातकर्मसंस्कारः

जातकर्मसंस्कारः नवजातशिशोः संवर्धनार्थं तथा च तस्य परिपोषणार्थं भवति। एतस्मिन् नाभिवर्धनात्पूर्वं पञ्च ब्राह्मणैः वैश्वानराग्नेः स्तुतिः भवति। तथा च आहुतिः अपि देयं भवति। येन शिशोदीर्घायुष्यम् एवम् अभ्युदयश्च भवति। गर्भकोशात् शिशुः निर्गते सति जातकर्म विधीयते। पुत्रमुखदर्शनेन पिता नाभिवर्धनात् प्राक् शीतोदकेन सतैलस्नानं विधाय उत्तराभिमुखं भूत्वा यथाविधिः जातकर्म कुर्यात। जातकर्मणि पितृनुद्दिश्य नान्दीमुखश्राद्धादिकर्माणि क्रियन्ते। एतत्सर्वं शौचानन्तरमेव कर्तव्यम्।

5 नामकरणसंस्कारः

अयं संस्कारः शिशोः जन्मानन्तरदश वा एकादशदिनानन्तरं भवति। गोपनीयं नाम तु जातकर्मसंस्कारे एव भवति। उच्चारणार्हं नाम एतस्मिन् दिने भवति। शुभमुहूर्ते नक्षत्रे च मघुरध्वनियुक्तं नामचतुराक्षरैः वा द्वि अक्षरात्मकं भवति। नाम्नः करणं नामकरणम्। शिशोः जन्मनः दशमे एकादशे वा दिवसे पुण्यावसरे पिता आचम्य 'अस्य पुत्रस्य नामकरणं करिष्ये' इति संकल्प्य पुण्याहं कथयित्वा नान्दीश्राध्दं च विधाय ब्राह्मणान् भोजयित्वा कुमारस्य नाम दद्यात् । ब्राह्मणशिशोः जन्मतः दशमदिवसे, क्षत्रियाणां त्रयोदशे षोडशे वा दिवसे, वैश्यानां षोडशे विंशतितमे वा दिवसे, शुद्राणां द्वाविंशे मासान्ते वा नामकरणसंस्कारः करणीयः ।

6 कर्णवेधसंस्कारः

कर्णवेधं प्रशंसन्ति पुष्ट्यायुः श्री विवृद्धये इति गर्गस्य उक्त्या अस्य संस्कारस्य प्रशंसा ज्ञायते ।अस्मिन् संस्कारे प्रथमं बालकस्य दक्षिणे कर्णे सूर्यकिरणप्रवेशयोग्यं छिद्रं तदनु वामकर्णे क्रियते। संस्कारेण अनेन अन्त्रवृद्धिः न भवति इति स्मृतिकाराणां मतम् यद् -

शङ्ग्रेपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीयम्।
व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धि निवृत्तये॥

कर्णवेधसंस्कारात् बालकेषु नपुंसकत्वम्, बालिकासु च वन्ध्यात्वं न भवति इति स्मृतिसङ्गहबोधनम्।

7 निष्क्रमणसंस्कारः

शिशोः गृहाद् प्रथमबहिर्निगमनं निष्क्रमणमित्युच्यते। चतुर्थमासे शुभे दिने संस्कारोऽयं करणीय इति मनुनोक्तम्। शिशोःमानसिक्याभिवृद्ध्यर्थं, बाह्मजगतः ज्ञाननिमित्तं, श्रीवृद्ध्यर्थं संस्कारोऽयं विधीयते।

8 अन्नप्राशनसंस्कारः

अन्नं प्राश्यते येन कर्मणा तदन्नप्राशनम्। षष्ठे मासे अथवा कुलधर्मत्वेन माङ्गल्यकालविशेषे मासेऽन्नप्राशनं करणीयमिति मनुना प्रोक्तम्। 'षष्ठे मासेऽन्नप्राशनम्' इति पारशगृह्यसूत्रम्। 'घृतोदनं तेजस्कामः दधिमधु घृतमिश्रमन्नं प्राशयेत्' इति आश्वलायनगृह्यसूत्रम्। सामान्यतः दधिमधुघृतमिश्रितमन्नं शिशवेऽन्नप्राशनाय प्रदीयते। काठकगृह्यसूत्रानुसारेण शिशोः दन्तजननानन्तरमन्नप्राशनं विधेयम्। तस्मिन् दिवसे सिद्धं सुमिष्टं चान्नमिष्टदेवेभ्यः उत्सर्गीकृत्य पिता पुत्रं मन्त्रपाठपूर्वकं भोजयेत्।

9 चूडाकर्मसंस्कारः

चूडानां केशपाशानां संस्कारो येन कर्मणा क्रियते तत् चूडाकर्मेति कथ्यते। प्रथमे तृतीये वा संवत्सरे अथवा कुलधर्मानुसारेण् संस्कारोऽयं करणीयः। प्रवरसंख्यानुसारेण चूडाकरणसंस्कारः कल्पितः। शिखा एकाधिका भवितुमर्हति। वशिष्ठगोत्रियाः शिरोमध्यभागे एकां शिखां धारयन्ति। अत्रिकाश्यपगोत्रियाः पञ्चशिखाः धरन्ति। भृगुवंशीयाः सर्वमुण्डिताः भवन्ति।

10 उपनयनसंस्कारः

बालसंस्काराणाम् उपनयनाख्यः संस्कारः एव सर्वप्रधानः। वेदाध्ययनाय गुरोः शिष्यस्य समीपे गमनम् उपनयनम् इति उच्यते। उपनयन शब्दोऽयम् उपपूर्वक नी धातोः ल्युट् प्रत्यययोगे निष्पद्यते। उप समीपं नयनमुपनयनम् इति। यदा पिता वेदम् अध्यापयितुम् असमर्थो भवति तदा स्वयं स्वपुत्रम् आचार्यस्य समीपं नीत्वा तस्य उपनयनार्थं प्रार्थयेत। आचार्यः तम् उपनीय शिष्यत्वेन अङ्गीकृत्य तम् अध्यापयेत्। महर्षिगौतममतानुसारेण प्रथमतः अष्टमवर्षवयस्कं माणवकम् उपनयनसंस्कारेण संस्कुर्यात्। उपनयनं हि माणवकसंस्कारः।

11 वेदारम्भसंस्कारः

उपनयनसंस्कारस्य अनन्तरं गुरुः शिष्यं वेदान् शिक्षयेत्। तदारम्भप्रधानः संस्कारः एव अयम्। उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्। वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ? (याज्ञवल्क्यस्मृतिः) वेदारम्भः प्रथमं निजशाखायाः एव स्यात। निजशाखां साङ्गोपाङ्गम् अधीत्य ततः शाखान्तराध्ययनक्रमः विहितः।

12 केशान्तसंस्कारः

षोडशे वर्षे केशान्तसंस्कारः सम्पादनीयः। संस्कारोऽयं ब्रह्मचर्यस्य समाप्तिमेव सूचयति। अस्मिन् संस्कारे ब्रह्मचारी केशानां श्मश्रूणां च क्षौरं करोति। अवसरेऽस्मिन् आचार्याय गोदानं क्रियते। नापितमपि उपहारः प्रदीयते।

13 समावर्तनसंस्कारः

द्वादशवर्षाणि वेदग्रहणान्तं वा गुरुकुले ब्रह्मचर्यम् आचरित्वा ततः प्रतिनिवृत्तेः काले समावर्तनाख्यः संस्कारः अनुष्ठेयः। तत्र प्रधानभूतं कर्म स्नानम्। तच्च तस्य ब्रह्मचर्यप्रक्षालनोद्देशेन क्रियते। तेन सः स्नातकाख्यो भवति। अत आश्रमाद् गृहगमनं समावर्तनम् इति उच्यते। संस्कारेस्मिन् गुरोः उपदेशः भवति। एष उपदेशो ब्रह्मचारिणः जीवनयात्रां सुखदां सरलां च कर्तुं सारगर्भितो भवति। उपदेशवाक्यानि श्रद्धा-विश्वास-प्रेम-भक्ति-ज्ञान-वैराग्यादीनि ऐहिकपारलौकिककल्याणानि वर्षन्तीव भान्ति।

14 विवाहसंस्कारः

गृहस्थाश्रमं प्रविविक्षता 'विवाहसंस्कारः' अनुष्ठीयते। अयं संस्कारः स्त्रीणामपि भवति। गृहस्थाश्रमपरिपालनाय गृहिण्याः अपेक्षा भवति। अतः स्त्रीपुरुषयोः सौन्दर्यं, पौरुषं, नारीत्वं, चरित्रं, कुलं चेति बाह्याभ्यन्तरदृष्ट्या उद्वाहः, परिणयनं, विवाहः इति वा अभिधीयते इहामुक्तं च -

नारीणां परमा गतिः पतिः।
भर्तृमार्गानुसरणं स्त्रीणां हि परमं व्रतम्।
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तस्याः पुत्रं प्राप्य पुरुषः पूर्णोऽभवत्।
पुत्रलाभेन पितणाम् ऋणाद् मुक्तिः।

इत्यादिभिः सुभाषितैः अस्य संस्कारस्य महत्त्वम् अवगम्यते। विवाहाग्निपरिग्रह संस्कारः आश्रमेषु गृहस्थाश्रमः विशिष्टः अस्ति। अस्मिन् प्रवेशार्हता विवाहसंस्कारेण भवति। धर्मशास्त्रानुगुणम् आह्निकाचारयोः महत्त्वपूर्णं स्थानम् आस्ते।

16 अन्त्येष्टिसंस्कारः

अयं संस्कारः मानवजीवनस्यान्तिमसंस्कारः, येन संस्कारेण सह तस्य जीवनं समाप्यते। अन्त्येष्टेः कारणेन मनुष्यः परलोकं प्राप्नोति। मृत्युपरवर्तिजीवनस्य सरलीकरणाय अयं संस्कारः अनुष्ठीयते।

भगवती गङ्गा- 'दिव्यमुक्तेः पवित्रतायाः च अनन्तः प्रवाहः'



भगवतः विष्णोः ज्ञानरूपा भावरूपा क्रियारूपा च तिस्रः शक्तयः वर्तन्ते, ताश्च भगवती लक्ष्मी, भगवती सरस्वती, भगवती गङ्गा चेति विद्वद्भिः निगद्यते। एकदा भगवान् विष्णुः भगवतीं गङ्गाम् अकथयत् – 'त्वं पृथिव्यां पवित्र-नदीत्वेन भवितासि या हि वसुधा-वासिनाम् अखिलानां प्राणिनां पापानि अपाकरिष्यति। सूर्य-वन्शावतन्सः भगीरथः नाम राजा त्वां पृथ्वीं सन्नेष्यति। अनन्तरं त्वं भगवतः शिवस्य पत्नीरूपेण कैलास-पर्वतं
प्रतिष्ठिता भवितासि।' सूर्यवन्शे सगरः नाम नृपतिः अभवत्, स च अश्वमेध-यागस्य अनुष्ठानम् अकरोत्। यज्ञ-सम्पूर्ति-हेतोः सगरस्य षष्टि-सहस्रं पुत्राः यागस्य अश्वेन सह पूर्णस्य विश्वस्य पर्यटनं कृतवन्तः। परञ्च यथैव ते सागर-तटस्य समीपम् आगताः, यज्ञ-अश्वः सहसा विलुप्तः जातः। कुत्र गतोऽयम् अश्वः नृपतेः सगरस्य पुत्राः विलुप्तम् अश्वं सर्वत्र अन्विष्टवन्तः। अश्वस्य अन्वेषणार्थं यदा पृथिव्यां न किमपि स्थानम् अवशिष्टम्, तदा ते अन्ततः पाताल-लोकं प्रयाताः। तत्र ते अश्वं दृष्टवन्तः। अयम् अश्वः गूढ-ध्यानस्थं महर्षिं कपिलं निकषा बद्धः आसीत्। वस्तुतस्तु, देवेन्द्रः अमुम् अश्वं चोरितवान्। सगर-पुत्राः तथ्यमिदम् अजानन्तः महर्षिं कपिलम् आक्रान्तुं सन्नद्धाः जाताः। क्रोधेन आविष्टः महर्षिः स्वीय-नेत्रे उन्मील्य दृष्टि-मात्रेण तान् भस्मीसात् चकार। नृपतिः सगरः विलुप्तान् राजकुमारान् अन्वेष्टुं स्वीयं पौत्रम् 'अन्शुमन्तं' प्रेषितवान्। अन्शुमान् यदा महर्षिं दृष्टवान् , सादरम् असौ तं नमस्कृतवान्। अन्शुमतः विनम्रताम् अवलोक्य प्रसन्नः तपोमूर्तिः कपिलः अश्वं परावर्तितवान् , अवादीत् च, यत् ' सगर-पुत्राणां मुक्तये त्वया भगवती गङ्गा धरातलम् आनेतव्या।' परञ्च अन्शुमान् तस्य पुत्रः दिलीपः वा एतत् कार्यं कर्तुं नैव अपारयताम् ˝तत्रान्तरे, दिलीपस्य आत्मजः भगीरथः राजा अभवत्।
भगीरथः भगवतीं गङ्गां धरातलम् अवतारयितुं समैहत। सः स्वीय-राज्य-कार्य-भारं निज-मन्त्रिभ्यः दत्वा तपश्चर्याम् आचरितुं हिमालयं प्रति अगच्छत्। भगीरथस्य अनेक-वर्षीय-कठोर-तपश्चर्यायाः अनन्तरम् , भगवती गङ्गा तस्य समक्षं प्रत्यक्षीभूता। भगीरथस्य श्रद्धया समर्पणेन च तुष्टा भगवती गङ्गा अवोचत् – ' भो भगीरथ ! अहं धरातलम् आगन्तुं सन्नद्धा अस्मि। परन्तु भगवान् शिवः एव मम अवतरण-वेगं धारयितुं शक्ष्यति।'
कृतनिश्चयः भगीरथः भगवन्तं शिवं प्रसादयितुं पुनः तपः आचरितवान्। अनेकेषां वर्षाणाम् अन्तरालानन्तरं भगवान् शिवः प्रत्यक्षीभूतः। भगीरथस्य कामनां प्रपूरयन् भगवान् शिवः अवादीत् – 'स्वर्गतः अवतरन्त्याः गङ्गायाः प्रवाह-वेगं धारयितुं शक्ष्यामि।'
एवं प्रकारेण, भगवान् शिवः निज-जटा-कलापे स्थातुं भगवतीं गङ्गां सत्कृतवान्। तदनु, भगवती गङ्गा कौतुकेन विचारितवती- 'मन्ये, भगवान् शिवः सुदीर्घ-कालं यावत् मम प्रवाह-वेगं धारयितुं नैव शक्ष्यति। कथं नाहं भगवन्तं शिवम् आत्मना साकमेव पाताल-लोकं नयेयम् ?' परन्तु सर्वज्ञः भगवान् शिवः भगवतीं गङ्गां स्वीय-जटा-कलापे आबद्धवान्। अनेक-वर्षाणि यावत् भगवती गङ्गा ततः निष्क्रान्तुं निरर्थकं प्रायतत। भगीरथः पुनः भगवन्तं शिवं प्रसादयितुं तपस्याम् अकरोत्। भगवान् शिवः स्वीयं जटा-कलापं उन्मोचितवान्, ततः गङ्गा-प्रवाहं पृथ्वीम् अस्पृशत्।
पृथिव्यां अवतरितस्य गङ्गा-जलस्य सप्त-धाराः अभूवन्। तासु धारा-त्रयं प्राचीं प्रति, अपरं धारा-त्रयं प्रतीचीं प्रति प्रावहत्। सप्तमः प्रवाहः भगीरथम् अन्वगच्छत् , अपि च, अन्तिमत्वेन महात्मनः जह्नोः आश्रमं प्राप्तवान्। अहङ्कार-पूर्णा भगवती गङ्गा सोत्साहं स्वीय-शक्ति-प्रदर्शनार्थं आश्रमं जलाप्लावितम् अकरोत्। अनेन विक्षोभेण क्रुद्धः महात्मा जह्नुः गङ्गायाः अपान्सि पीतवान् , गङ्गां च शोषितवान्। भगीरथः महर्षेः पादारविन्दयोः निपत्य याचितवान् यत् – 'कृपया गङ्गा-देवीं क्षम्यताम्, हे महात्मन् ! भवान् यदि एनां विमोक्ष्यसि चेत्, मम पूर्वजाः मुक्ताः भवितारः। '
महात्मा जह्नुः भगीरथे करुणान्वितः सन् गङ्गा-प्रवाहं निज-कर्ण-कुहरात् बहिः निष्कासितवान्। ततः प्रभृति देवी गङ्गा जाह्नवी- इति नाम्ना अपि प्रख्याता जाता। जाह्नवी अर्थात् जह्नु-मुनेः जाता सरित् वा कन्या।
ततः परम्, भगीरथः गङ्गां पाताल-लोकम् अनयत् ˝यथैव देवी गङ्गा सगर-पुत्राणां भस्मावशेष-स्थलीम् आप्लावितवती, ते सर्वे अपि मुक्ताः सञ्जाताः। एवं रीत्या, भगीरथः यत् कार्य-लक्ष्यं निश्चितवान् , तत् पूर्णताम् अनयत्। ततः परम्, भगीरथः देवीं गङ्गां सागरं प्रति नीतवान्।
अनेक-वर्षाणि व्यतीतानि। एकदा नृपतिः शन्तनुः गङ्गा-नद्याः तीरे सुन्दरीं रमणीमेकाम् अपश्यत्। वस्तुतः एषा मानव-रूपधारिणी भगवती गङ्गा आसीत्।
'भो परम-सौन्दर्य-शालिनि महाभागे, ममेदं सौभाग्यम् अभविष्यत्, यदि भवती मम अर्धाङ्गिनी अभविष्यत्', - शन्तनुः स्वीयां समीहां प्राकटयत्। भगवती गङ्गा प्रसन्ना सती उदतरत् –'ससमयं भवता सह विवाहं करिष्यामि। कदाचिदपि भवान् मम कार्य-विषयिणीं पृच्छां नैव करिष्यति - इति।'
राजा शन्तनुः समयमेनं स्वीकृतवान् , अपि च, अनयोः विवाहः महता समारम्भेण वैभवेन च सम्पन्नः। किञ्चित्-कालानन्तरम्, ताभ्याम् एकः पुत्रः अजायत। भगवती गङ्गा च किम् अकरोत्...? सा तं पुत्रं नद्याम् अक्षिपत्। राजा शन्तनुः स्तब्धः एवातिष्ठत् यतो हि तेन स्वीय-पत्न्या सह कृतः समयः परिपालनीयः आसीत्। पत्न्याः आश्चर्यकारिणः कार्यस्य विषये स न किमपि प्रष्टुम् अपारयत्।
एतावत्-पर्यन्तमेव पर्याप्तं नासीत्। सा अपरान् अपि नव-जातान् षट् पुत्रान् नद्याम् अक्षिपत्। राजा शन्तनुः स्वीय-दुःखं नियन्त्रितवान् परं निज-पत्नीं न किमपि प्रष्टुम् अपारयत्। परञ्च, भगवती गङ्गा यथैव स्वीयम् अष्टमं पुत्रं नद्याम् प्रक्षेप्तुम् उद्यता, राजा शन्तनुः ताम् अवरोधितवान्, प्रार्थितवान् च - 'कृपया आत्मजम् एनं जीवितुम् आज्ञापय।' तस्मिन् क्षणे एव भगवती गङ्गा स्वीय-पुत्रेण साकं तिरोहिता बभूव। अनेक-वर्षाणि व्यतीतानि। राजा शन्तनुः यदा मृगयार्थं गतः आसीत्, सः अनुपममेकं दृश्यम् अपश्यत्। कश्चन परस्सहस्रं शरौघैः भित्तिं निर्मीय गङ्गा-प्रवाहम् अवरोधितवान्। शन्तनुः किञ्चित् अग्रे गत्वा अपश्यत् यत् तत्र एकः बालकः स्थितोऽस्ति। अयमेव बालकः परस्सहस्रं शरौघैः भित्तिं निर्मीय गङ्गा-प्रवाहम् एवम् अवरोधितवान्। शन्तनुः सन्निकटं गत्वा तं द्रष्टुम् ऐच्छत् परञ्च सः तिरोहितः। तस्मिन्नेव क्षणे शन्तनुः अन्वभवत् यद् - ' कदाचित् एषः मम पुत्रः सम्भवेत् ?
'शन्तनुः सौत्सुक्यं देवीं गङ्गां प्रार्थितवान्। भगवती गङ्गा निज-पुत्रेण साकं स्वयमेव उपस्थिता अजायत न्यगादीच्च यत् 'अयमेव अस्मदीयः अष्टमः पुत्रः देवव्रतः अस्ति।' भगवती गङ्गा एतदपि न्यगादीत् यत् 'अष्टसु वसुषु अन्यतमः अयं द्यौः अस्ति यः अस्माकं पुत्र-रूपेण पुनर्जातोऽस्ति। कृपया एनं स्वीकरोतु।' भगवती गङ्गा शन्तनवे देवव्रतं दत्वा कैलासम् आरूढवती, महाविष्णोः वचनञ्च सत्यापितवती।
ड32. एषा अस्ति कथा यत् भारतस्य पवित्रा नदी गङ्गा केन प्रकारेण धरातलम् अवतीर्णा। गङ्गायाः पवित्रता-विषये महाभारत-ग्रन्थे लिखितमस्ति यत् 'दुष्कर्म-निवृत्यर्थं गङ्गा-जलावगाहनं परमावश्यकम्। गङ्गा-जलावगाहनं शत-यागानाम् अनुष्ठान-तुल्यं वर्तते। भारतवासिनां कृते गङ्गा केवलं नदी एव नैवास्ति परमेषास्ति – 'दिव्य-मुक्तेः पवित्रतायाः च अनन्त-प्रवाहः बलदेवानन्दसागरः....।



रम्या रामायणी कथा



मर्यादा पुरुषोत्तम श्री राम की जीवन गाथा

॥श्री राम कथा॥

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥

यदा द्वन्दयुद्धे वानरराजसुग्रीवो गर्जन् किष्किन्धानरेशं वालिनं युद्धाय अह्वयत्। द्वौ भ्रातरौ वर्णरूपादिषु समानौ पश्यतः स्म। वाली महाबलवान् आसीत्। सुग्रीवस्य शक्तिः तत्समक्षं क्षीणं जाता। तदा श्रीरामः वालिवक्षसि बाणेन प्रहारं कृतवान्। वाली तत्क्षणं महीतले निपपात। वाली श्रीराममकथयत्, हे प्रभो ! धर्मरक्षार्थं भवदवतारो जातः, तदपि भवता मामधर्मपूर्वकं हतवान्। मया श्रुतम्, यत् साम, दानम्, क्षमा, धर्मः, सत्यम्, धृतिपराक्रमौ च नृपाणां सद्गुणाः सन्ति, तदपि भवान् कथं तेषामनुपालनं कृत-वान् हे भगवन्! वयं वनचराः सन्ति, एषा प्रकृतिरस्माकं वर्तते। भवत्कृते सुग्रीवः प्रियः जातः किन्तु अहं तु कथं शत्रुर्जातः वालिनो वचनानि श्रुत्वा भगवान् वालिनमकथयत्। हे वानरेन्द्र! मया कथं त्वं हतः, अधुना तत्कारणं त्वया श्रोतव्यम्। लघुभ्रातृस्त्री पुत्रीतुल्या भवतीति सनानतनधर्मस्य मर्यादा वर्तते। त्वया अनुजभार्यया सह धर्मविरुद्धं कार्यं कृतम्, अनेन मया त्वं हतः। 'अनुज बधू भगिनी सुत नारी।
सुनु सठ कन्या सम ए चारी?'
'इन्हहि कुदृष्टि बिलोकइ जोई।
ताहि बधें कछु पाप न होई ' इति।
अनुजभार्या, भगिनी, सुतनारी च एताः कन्यातुल्यैव सन्ति। अत एव ऐताः प्रति ये कुदृष्टिं धारयन्ति, तद्वधेन किञ्चदपि पापकर्म न भवतीति सनातनसिद्धान्तोऽस्ति। भगवद्वचनानि श्रुत्वा वाली स्व-अपराधबोधमनुभवत्।



आचार्य अरविंद पांडेय

-क्रमशः

सुवचनानि


अतिपरिचयादवज्ञा ।
अतिलोभो विनाशाय ।
अतितृष्णा न कर्तव्या ।
अति सर्वत्र वर्जयेत् ।
अधिकस्याधिकं फलम् ।
अनतिक्रमणीया हि नियतिः ।
अल्पश्च कालो बहवश्च विघ्नाः ।
अलभ्यो लाभः ।
अव्यापारेषु व्यापारः ।
अहिंसा परमो धर्मः ।
अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ।
अर्थो हि लोके पुरुषस्य बन्धुः ।
आकृतिर्बकस्य दृष्टिस्तु काकस्य ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ।
इक्षुः मधुरोऽपि समूलं न भक्ष्यः ।
इतः कूपः ततस्तटी ।
इतो भ्रष्टस्ततो भ्रष्टः ।
ईश्वरेच्छा बलीयसी ।
उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः ।
उत्सवप्रियाः खलु मनुष्याः ।
कण्टकेनैव कण्टकमुद्धरेत् ।
कर्तव्यो महदाश्रयः ।
कवयः किं न पश्यन्ति ?
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।

कालाय तस्मै नमः ।
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।
किमिव हि दुष्करमकरुणानाम् ।
किं मिष्टमन्नं खरसूकराणाम् ?
क्षमया किं न सिद्ध्यति ।
क्लेशः फलेन हि पुनर्नवतां विधत्ते ।
गतं न शोच्यम् ।
गतानुगतिको लोकः न कश्चित् पारमार्थिकः ।
गहना कर्मणो गतिः ।
गुणाः सर्वत्र पूज्यन्ते ।
चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
जीवो जीवस्य जीवनम् ।
त्रुटितः सम्बन्धः प्रशान्तः कलहः ।
त्रैलोक्ये दीपकः धर्मः ।
दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।
दूरतः पर्वताः रम्याः ।
द्रव्येण सर्वे वशाः ।
धर्मो मित्रं मृतस्य ।
धीराः हि तरन्ति आपदम् ।
नास्ति सत्यसमो धर्मः ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।
न भूतो न भविष्यति ?

नमः शिवाय ।
नमो भगवते वासुदेवाय ।
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
न शान्तेः परमं सुखम् ।
निगूढेऽपि कुक्कुटे उदेत्येव अरुणः ।
निर्वाणदीपे किमु तैलदानम् ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।
निःस्पृहस्य तृणं जगत् ।
न निश्चितार्थात् विरमन्ति धीराः ।
निर्धनस्य कुतः सुखम् ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।
परदुःखं शीतलम् ।
परोपकारार्थमिदं शरीरम् ।
परोपदेशे पाण्डित्यम् ।
परोपकारः पुण्याय ।
परोपकाराय सतां विभूतयः ।
पुनः पुनरपि प्रक्षाल्य कज्जलं न श्वेतायते ।
पिण्डे पिण्डे मतिर्भिन्ना ।
प्रज्ज्वालितो ज्ञानमयः प्रदीपः ।
प्रथमग्रासे मक्षिकापातः ।
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
बधिरात् मन्दकर्णः श्रेयान् ।
बहुजनहिताय बहुजनसुखाय ।
बहुरत्न वसुन्धरा ।

सुविचार्य विधातव्यम्

इयं कथा सोमदेवस्य कृतात् 'कथासरित्सागरात्' उद्धृता अस्ति । तत्र 'चतुर्व्यूहम्' एकं पाठं वर्तते । तत्रैव 'गोदोहनम्' अस्ति । अस्यां कथायाम् समयस्य महत्त्वं प्रतिपादयति आसीत् पुरा माधवो नाम कश्चिद् गोपालकः । तस्य गृहे नन्दिनी नाम एका गौः आसीत् । तस्याः दुग्धं विक्रीय सः सुखेन जीवनं यापयति स्म ।
एकदा तस्य भागिनेयः तत्रागत्य सूचितवान्---'मातुल ! प्रतिवेशिनः श्रेष्ठिनः गृहे मासानन्तरम् एकः यज्ञः संपत्स्यते । तस्मिन् उत्सवे पञ्चाशत् किलोमितस्य क्षीरस्य आवश्यकता भविष्यति ।' इदमाकर्ण्य माधवः अचिन्यत्---'पञ्चाशत् किलोमितस्य पयः , अस्तु दास्यामि । एतावन्मात्रं पयः विक्रीय बहुधनं प्राप्स्यते, येन एकस्य भवनस्य निर्माणं करिष्यामि ।'अथ प्रसन्नः माधवः स्वधेनुम् अहर्निशं सेवते । सः तस्याः रज्जुं धृत्वा तस्यै तृप्तिपर्यन्तं प्रभूतं घासादिकं ददाति, जलं पाययति, विषाणयोः तैलं करोति । प्रातः सायं च तां तिलकं करोति । यदा-कदा गुडादिकमपि भोजयति । स सर्वदा



चिन्तयामास--'एकवारं ग्रहीष्यामि पयोऽस्या प्राज्यम् उत्सवे ।'
इत्थं सेवानिरतस्य तस्य एकः मासः व्यतीतः । अस्मिन्नन्तरे तस्य भार्या मालती पितृगृहात् प्रत्यावर्तत । माधवः ताम् तत्सर्वं विस्तरेण अकथयत् । तौ सत्वरं कुम्भकारस्य गृहाद् घटदशकं क्रीतवन्तौ । तदैव प्रतिवेशी दुग्धाय तम् आकारयत् । माधवस्तु सपदि पञ्च-उपचारैः गाम् अपूजयत् । पात्रहस्तः दोहनाय गोः समीपम् अगच्छत् मासैकपर्यन्तं दुग्धस्य अदोहनात् दुग्धहीना सा माधवहस्ते पात्रं दृष्ट्वा एव अकूर्दत् । माधवः पौनःपुन्येन प्राथर्यति---'नन्दिनि ! कथं मां व्याकुलयसि ? पञ्चाशत् किलोमितं क्षीरं सत्वरं यच्छ ।' पौनः पुन्येन दोग्धुं प्रयतमानं माधवं सा पृष्ठपादाभ्यां ताडयित्वा रक्तरञ्जितम् अकरोत् । तं तादृशायाम् अवस्थायां वीक्ष्य मालती मूर्च्छिता जाता । बहुभिः उपचारैः तस्याः मूर्च्छाम् दूरीकृत्य माधवः ताम् अकथयत्- 'मासान्तेऽहं धनी भविष्यामि इति चिन्तयित्वा एव मासपर्यन्तं मया धेनुरेव न दुग्धा । अस्मात् कारणाद् इयं दुग्धहीनाऽभवत् ।

प्रेरणाश्रोत

जगदगुरू शंकराचार्य ज्योतिष्पीठ काशी पीठाधीश्वर ब्र.ली. स्वामी विद्यानंद सरस्वती जी महराज (मौनी जी), शाश्श्वतानन्द सरस्वती जी महाराज।

संरक्षक मण्डल

योग गुरू स्वामी आनन्द गिरि जी
(बांध स्थित बड़े हनुमान जी)

डॉ भगवत् शरण शुक्ल
प्रोफेसर-व्याकरण विभाग-संस्कृतविद्या धर्मविज्ञान संकाय
काशी हिन्दू विश्वविद्यालय वाराणसी

प्रमोद बंसल
निदेशक-महारानी चाय, प्रयागराज

सलाहकार

श्रीमती अनामिका चौधरी
(सदस्य राज्य महिला आयोग)
डा. पुष्पा पाल (एमजीएम हास्पिटल)
- सुनील सराफ
(अवतार केमिस्ट)
-पं. देवेन्द्र प्रसाद त्रिपाठी
-एसो. प्रो. डॉ. मुरली मनोहर द्विवेदी
-डॉ. शम्भुनाथ त्रिपाठी (अंशुल)
-डा. मोरार जी त्रिपाठी
-आचार्य कुशलदेव
(प्रवक्ता गुरुकुल महाविद्यालय ततारपुर हापुड़।)
-महेश जी कपूर
डा. कृष्णानन्द पाण्डेय
फादर - थॉमस कुमार
उपसम्पादक - विनम्र शुक्ल
विशेषवार्ताहरः
डॉ प्रदीप्त कुमार नंदः

प्रयागराज (इलाहाबाद)

RNI No. : UPSAN/2018/76680

स्वामी मुद्रकः प्रकाशकश्च **आनन्द नारायण शुक्ल** द्वारा रमा प्रिन्टिग प्रेस, 53/25/1,ए बेली रोड, नया कटरा, प्रयागराज से मुद्रित एवं 1286बी/541बी नेहरू नगर मीरापुर, प्रयागराज से प्रकाशित।
मो.-9415633297
संपादक-राकेश शर्मा

वैधानिक सूचनाः आह्निक वार्ता पत्रम् से सम्बन्धित समस्त विवाद के निपटारे का क्षेत्र इलाहाबाद (प्रयागराज) न्यायालय होगा।